# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर्, २०१८

| | | |
|---|---|---|
| कक्षा - आचार्यप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – ५** | |
| विषयः - साहित्यम् | (CE-4.1.1 New) | **गुणाः - ७०** |
| दिनाङ्कः -१९/१२/२०१८ | *ग्रन्थः उत्तररामचरितम्-१ तः ३ अङ्काः* | **समयः -०२.०० तः ०५.००** |

**प्रथमान्वितिः**

**प्रश्नः १ निम्नलिखितयोः एकस्य व्याख्यां कुरुत ।** **( ०५ )**

( १ ) *सर्वथा व्यवहर्त्तव्यं कुतो ह्यवचनीयता ।*
*यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जनः ॥*

( २ ) *स्नेहं दयां च सौख्यं च यदि वा जानकीमपि ।*
*आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा ॥*

**प्रश्नः २** *महाकविभवभूतेः परिचयं लिखत ।* **( १० )**

*अथवा*

*उत्तररामचरितस्य वैशिष्ट्यं लिखत ।*

**द्वितीयान्वितिः**

**प्रश्नः ३ निम्नलिखितयोः एकं ससन्दर्भं व्याख्यायत ।** **( ०५ )**

( १ ) *इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयो रसावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः ।*
*अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः किमस्या न प्रेयो यदि परमसह्यस्तु विरहः ॥*

( २ ) *ते हि मन्ये महात्मानः कृतघ्नेन दुरात्मना ।*
*मया गृहीतनामानः स्पृश्यन्त इव पाप्मना ॥*

**प्रश्नः ४** *चित्रदर्शनप्रसंगस्य नाटकीयदृष्ट्या मह वं लिखत ।* **( १० )**

*अथवा*

*सीतापरित्यागावसरे रामस्य मनोवेदनां वर्णयत ।*

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितयोः एकं ससन्दर्भं व्याख्यायत ।** **( ०५ )**

( १ ) *वज्रादपि कठोराणि मृदूनि कुसुमादपि ।*
*लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति ॥*

( २ ) *न किञ्चदपि कुर्वाणः सौख्यैर्दुःखान्यपोहित ।*
*तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः ॥*

**प्रश्नः ६** *शम्बूकवधवृत्तान्तं ग्रन्थानुसारं लिखत।* **( १० )**

*अथवा*

*दण्डकारण्यं दृष्ट्या रामस्य पूर्वसंस्मरणानां वर्णनं कुरुत।*

**चतुर्थान्वितिः**

**प्रश्नः ७ निम्नलिखितयोः एकं ससन्दर्भं व्याख्यायत। ( ०५ )**

( १ ) *अनिर्भिन्नो गभीरत्वादन्तर्गूढो घनव्यथः।*
*पुटपाकप्रतीकाशो रामस्य करुणो रसः॥*

*(२) अन्तः करणतत्त्वस्य दम्पत्योः स्नेहसंश्रयात्।*
*आन्नदग्रन्थिरेकोऽयमपत्यमिति बध्यते॥*

**प्रश्नः ८** *तृतीयाङ्कस्य करुणरसं वर्णयत।* **( १० )**

*अथवा*

*छायाप्रसङ्गस्य महत्त्वं प्रतिपादयत॥*

**१ तः ४ अन्वितयः**

**प्रश्नः ९ अधोलिखितेभ्यः दशप्रश्नाः एकैकवाक्येन समाधेयाः। ( १० )**

*(१) पदवाक्यप्रमाणख्यः कः अस्ति ?*
*(२) भवभूतेः पितुः नाम किम् ?*
*(३) भवभूतेः माता का ?*
*(४) उत्तररामचरिते कति अङ्काः सन्ति ?*
*(५) प्रथमाङ्कस्य नाम किम् ?*
*(६) रामस्य गुप्तचरः कः ?*
*(७) दशरथस्य पुत्र्याः नाम किम् ?*
*(८) अर्थः केषां वाचम् अनुधावति ?*
*(९) रामस्य कुलगुरुः कः अस्ति ?*
*(१०) द्वितीयाङ्कस्य नाम किम् ?*
*(११) द्वितीयाङ्के तापस्याः नाम किम् ?*
*(१२) प्राज्ञे जडे च समानतया विद्यां कः वितरति ?*
*(१३) रामेण खरदुषणयोः वधः कस्मिन् स्थाने कृतः ?*
*(१४) तृतीयाङ्के आरम्भे द्वयोः नद्योः नाम किम् ?*
*(१५) सीता कस्य प्रसादेन छायारूपेण वर्तते ?*

--००--